# Natya Shastra Chapter 28

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૮ જાતિવિકલ્પ

## Document Information

Text title : naaTyashaastra adhyaaya 28 jaativikalpa

File name : natya28.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Haresh Bakshi hareshbakshi at hotmail.com

Proofread by : Haresh Bakshi hareshbakshi at hotmail.com

Latest update : December 10, 2006

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૮ જાતિવિકલ્પ

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અથ અષ્ટાવિંશોઽધ્યાયઃ ।
આતોદ્યવિધિમિદાનીં વક્ષ્યામઃ ।
તતં ચૈવાવનદ્ધં ચ ઘનં સુષિરમેવ ચ ।
ચતુર્વિધં તુ વિજ્ઞેયમાતોદ્યં લક્ષણાન્વિતમ્ ॥ ૧॥

તતં તન્ત્રીકૃતં જ્ઞેયમવનદ્ધં તુ પૌષ્કરમ્ ।
ઘનં તાલસ્તુ વિજ્ઞેયઃ સુષિરો વંશ ઉચ્યતે ॥ ૨॥

પ્રયોગસ્ત્રિવિધો હ્યેષાં વિજ્ઞેયો નાટકાશ્રયઃ ।
તતં ચૈવાવનદ્ધં ચ તથા નાટ્યકૃતોઽપરઃ ॥ ૩॥

તતઃ કુતપવિન્યાસો ગાયનઃ સપરિગ્રહઃ ।
વૈપઞ્ચિકો વૈણિકશ્ચ વંશવાદસ્તથૈવ ચ ॥ ૪॥

માર્દઙ્ગિકઃ પાણવિકસ્તથા દાર્દુરિકો બુધૈઃ ।
અવનદ્ધવિધાવેષ કુતપઃ સમુદાહૃતઃ ॥ ૫ ॥ ૧૧/૨૨
ઉત્તમાધમમધ્યાભિસ્તથા પ્રકૃતિભિર્યુતઃ ।
કુતપો નાટ્યયોગે તુ નાનાદેશસમાશ્રયઃ ॥ ૬॥

એવં ગાનં ચ વાદ્યં ચ નાટ્યં ચ વિવિધાશ્રયમ્ ।
અલાતચક્રપ્રતિમં કર્તવ્યં નાટ્યયોક્તૃભિઃ ॥ ૭॥

યત્તુ તન્ત્રીકૃતં પ્રોક્તં નાનાતોદ્યસમાશ્રયમ્ ।
ગાન્ધર્વમિતિ તજ્જ્ઞેયં સ્વરતાલપદાત્મકમ્ ॥ ૮॥

અત્યર્થમિષ્ટં દેવાનાં તથા પ્રીતિકરં પુનઃ ।
ગન્ધર્વાણાં ચ યસ્માદ્ધિ તસ્માદ્ગન્ધર્વમુચ્યતે ॥ ૯॥

અસ્ય યોનિર્ભવેદ્વાનં વીણા વંશસ્તથૈવ ચ ।
એતેષાં ચૈવ વક્ષ્યામિ વિધિં સ્વરસમુત્થિતમ્ ॥ ૧૦॥

ગાન્ધર્વં ત્રિવિધં વિદ્યાત્સ્વરતાલપદાત્મકમ્ ।
ત્રિવિધસ્યાપિ વક્ષ્યામિ લક્ષણં કર્મ ચૈવ હિ ॥ ૧૧॥

દ્વ્યધિષ્ઠાનાઃ સ્વરા વૈણાઃ શારીરાશ્ચ પ્રકીર્તિતાઃ ।
એતેષાં સમ્પ્રવક્ષ્યામિ વિધાનં લક્ષણાન્વિતમ્ ॥ ૧૨॥

સ્વરા ગ્રામૌ મૂર્ચ્છનાશ્ચ તાનાઃ સ્થાનાનિ વૃત્તયઃ ।
શુષ્કં સાધારણે વર્ણા હ્યલઙ્કારાશ્ચ ધાતવઃ ॥ ૧૩॥

શ્રુતયો યતયશ્ચૈવ નિત્યં સ્વરગતાત્મકાઃ ।
દારવ્યાં સમવાયસ્તુ વીણાયાં સમુદાહૃતઃ ॥ ૧૪॥

સ્વરા ગ્રામાવલઙ્કારા વર્ણાઃ સ્થાનાનિ જાતયઃ ।
સાધારણે ચ શરીર્યાં વીણાયામેષ સંગ્રહઃ ॥ ૧૫॥

વ્યઞ્જનાનિ સ્વરા વર્ણાઃ સન્ધયોઽથ વિભક્તયઃ ।
નામાખ્યાતોપસર્ગાશ્ચ નિપાતાસ્તદ્ધિતાઃ કૃતઃ ॥ ૧૬॥

છન્દોવિધિરલઙ્કારા જ્ઞેયઃ પદગતો વિધિઃ ।
નિબદ્ધં ચાનિબદ્ધં ચ દ્વિવિધં તત્પદં સ્મૃતમ્ ॥ ૧૭॥

ધ્રુવસ્ત્વાવાપનિષ્કામૌ વિક્ષેપોઽથ પ્રવેશનમ્ ।
શમ્યા તાલઃ સન્નિપાતઃ પરિવર્તઃ સવસ્તુકઃ ॥ ૧૮॥

માત્રા પ્રકરણાઙ્ગાનિ વિવારી યતયો લયાઃ ।
ગીતયોઽવયવા માર્ગાઃ પાદમાર્ગાઃ સપાણયઃ ॥ ૧૯॥

ઇત્યેકવિંશતિવિધં જ્ઞેયં તાલગતં બુધૈઃ ।
ગાન્ધર્વસંગ્રહો હ્યેષ વિસ્તરં તુ નિબોધત ॥ ૨૦॥

તત્ર સ્વરાઃ -
ષડ્જશ્ચ ઋષભશ્ચૈવ ગાન્ધારો મધ્યમસ્તથા ।
પઞ્ચમો ધૈવતશ્ચૈવ સપ્તમોઽથ નિષાદવાન્ ॥ ૨૧॥

ચતુર્વિધત્વમેતેષાં વિજ્ઞેયં ગાનયોક્તૃભિઃ ।
વાદી ચૈવાથ સંવાદી વિવાદી ચાનુવાદ્યપિ ॥ ૨૨॥

સંવાદો મધ્યમગ્રામે પઞ્ચમસ્યર્ષભસ્ય ચ ।

ષડ્જગ્રામે તુ ષડ્જસ્ય સંવાદઃ પઞ્ચમસ્ય ચ ॥ ૨૩॥

તિસ્રો દ્વે ચ ચતસ્રશ્ચ ચતસ્રસ્તિસ્ર એવ ચ ।
દ્વે ચૈવાધ ચતસ્રશ્ચ ષડ્જગ્રામે ભવેદ્વિધિઃ ॥ ૨૪॥

ચતુઃશ્રુતિર્ભવેત્ ષડ્જ ઋષભસ્ત્રિશ્રુતિઃ સ્મૃતઃ ।
દ્વિશ્રુતિશ્ચૈવ ગાન્ધારો મધ્યમશ્ચ ચતુઃશ્રુતિઃ ॥ ૨૫॥

પઞ્ચમસ્તદ્વદેવ સ્યાત્ ત્રિશ્રુતિર્ધૈવતો મતઃ ।
દ્વિશ્રુતિશ્ચ નિષાદઃ સ્યાત્ ષડ્જગ્રામે વિધિર્ભવેત્ ॥ ૨૬॥

અથ મૂર્ચ્છનાઃ દ્વૈગ્રામિક્યશ્ચતુર્દશ -
આદાવુત્તરમન્દ્રા સ્યાદ્રજની ચોત્તરાયતા ।
ચતુર્થી શુદ્ધષડ્જા તુ પઞ્ચમી મત્સરીકૃતા ॥ ૨૭॥

અશ્વક્રાન્તા તથા ષષ્ઠી સપ્તમી ચાભિરુદ્ગતા ।
ષડ્જગ્રામાશ્રિતા હ્યેતા વિજ્ઞેયાઃ સપ્તમૂર્ચ્છનાઃ ॥ ૨૮॥

ષડ્જે ચોત્તરમન્દ્રા સ્યાદૃષભે ચાભિરુદ્ગતા ।
અશ્વક્રાન્તા તુ ગાન્ધારે મધ્યમે મત્સરીકૃતા ॥ ૨૯॥

પઞ્ચમે શુદ્ધષડ્જા સ્યાદ્ધૈવતે ચોત્તરાયતા ।
નિષાદે રજની ચ સ્યાદિત્યેતાઃ ષડ્જમૂર્ચ્છનાઃ ॥ ૩૦॥

અથ મધ્યમગ્રામે -
સૌવીરી હરિણાશ્વા ચ સ્યાત્કલોપનતા તથા ।
શુદ્ધમધ્યા તથા માર્ગી પૌરવી હૃષ્યકા તથા ।
મધ્યમગ્રામજા હ્યેતા વિજ્ઞેયાઃ સપ્તમૂર્ચ્છનાઃ ॥ ૩૧॥

અપિ ચ -
ક્રમયુક્તાઃ સ્વરાઃ સપ્ત મૂર્ચ્છનેત્યભિસંજ્ઞિતાઃ ।
ષટ્પઞ્ચસ્વરકાસ્તાનાઃ ષાડવૌડુવિતાશ્રયાઃ ॥ ૩૨॥

સાધારણકૃતાશ્ચૈવ કાકલીસમલઙ્કૃતાઃ ।
અન્તરસ્વરસંયુક્તા મૂર્ચ્છના ગ્રામયોર્દ્વયોઃ ॥ ૩૩॥

યથા -
છાયાસુ ભવતિ શીતં પ્રસ્વેદો ભવતિ ચાતપસ્થસ્ય ।
ન ચ નાગતો વસન્તો ન ચ નિઃશેષઃ શિશિરકાલઃ ॥ ૩૪॥

ભવતશ્ચાત્ર -
અન્તરસ્વરસંયોગો નિત્યમારોહિસંશ્રયઃ ।
કાર્યો હ્યલ્પો વિશેષેણ નાવરોહી કદાચન ॥ ૩૫॥

ક્રિયમાણોઽવરોહી સ્યાદલ્પો વા યદિ વા બહુઃ ।
જાતિરાગં શ્રુતિં ચૈવ નયન્તે ત્વન્તરસ્વરાઃ ॥ ૩૬ ॥  ઇતિ॥

જાતીરિદાનીં વક્ષ્યામઃ ।
સ્વરસાધારણગતાસ્તિસ્રો જ્ઞેયાસ્તુ જાતયઃ ।
મધ્યમા પઞ્ચમી ચૈવ ષડ્જમધ્યા તથૈવ ચ ॥ ૩૭॥

આસામંશાસ્તુ વિજ્ઞેયાઃ ષડ્જમધ્યમપઞ્ચમાઃ ।
યથા સ્વં દુર્બલતરા વ્યક્તા સા પઞ્ચમી તથા ॥ ૩૮॥

જાતયોઽષ્ટાદશેત્યેવં બ્રહ્મણાભિહિતં પુરા ।
તાસ્ત્વહં વર્તયિષ્યામિ ગ્રહાંશાદિવિભાગતઃ ॥ ૩૯॥

ષાડ્જી ચૈવાર્ષભી ચૈવ ધૈવત્યથ નિષાદિની ।
ષડ્જોદીચ્યવતી ચૈવ તથા વૈ ષડ્જકૈશિકી ॥ ૪૦॥

ષડ્જમધ્યા તથા ચૈવ ષડ્જગ્રામસમાશ્રયાઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ મધ્યમગ્રામસંશ્રિતાઃ ॥ ૪૧॥

ગાન્ધારી મધ્યમા ચૈવ ગાન્ધારોદીચ્યવા તથા ।
પઞ્ચમી રક્તગાન્ધારી તથા ગાન્ધારપઞ્ચમી ॥ ૪૨॥

મધ્યમોદીચ્યવા ચૈવ નન્દયન્તિ તથૈવ ચ ।
કર્મારવી ચ વિજ્ઞેયા તથાન્ધ્રી કૈશિકી મતા ॥ ૪૩॥

સ્વરસાધારણગતાસ્તિસ્રો જ્ઞેયાસ્તુ જાતયઃ ।
મધ્યમા ષડ્જમધ્યા ચ પઞ્ચમી ચૈવ સૂરિભિઃ ॥ ૪૪॥

આસામંશાસ્તુ વિજ્ઞેયાઃ ષડ્જમધ્યમપઞ્ચમાઃ ।
યથાસ્વં દુર્બલતરં વ્યત્યાસાત્ત્વત્ર પઞ્ચમી ॥ ૪૫॥

શુદ્ધા વિકૃતાશ્ચૈવ હિ સમવાયાજ્જાતયસ્તુ જાયન્તે ।
પુનરેવાશુદ્ધકૃતા ભવન્ત્યથૈકાદશાન્યાસ્તુ ॥ ૪૬॥

તાસાં યન્નિર્વૃત્તાઃ સ્વરેષ્વથાંશેષુ જાતિષુ ચ જાતિઃ ।
તદ્વક્ષ્યામિ યથાવત્સંક્ષેપેણ ક્રમેણેહ ॥ ૪૭॥

પરસ્પરવિનિષ્પન્ના જ્ઞેયા હ્યેવં તુ જાતયઃ ।
પૃથગ્લક્ષણસંયુક્તા દ્વૈગ્રામિકાઃ સ્વરાશ્રયાઃ ॥ ૪૮॥

ચતસ્રો જાતયો નિત્યં જ્ઞેયાઃ સપ્તસ્વરા બુધૈઃ ।
ચતસ્રઃ ષટ્સ્વરા જ્ઞેયાઃ સ્મૃતાઃ પઞ્ચસ્વરા દશ ॥ ૪૯॥

મધ્યમોદીચ્યવા ચૈવ તથા વૈ ષડ્જકૈશિકી ।
કાર્મારવી ચ સમ્પૂર્ણા તથા ગાન્ધારપઞ્ચમી ॥ ૫૦॥

ષાડ્જ્યાન્ધ્રી નન્દયન્તી ચ ગાન્ધારોદીચ્યવા તથા ।
ચતસ્રઃ ષટ્સ્વરા હ્યેતાઃ જ્ઞેયાઃ પઞ્ચ સ્વરા દશ ॥ ૫૧॥

નૈષાદી ચાર્ષભી  ચૈવ ધૈવતી ષડ્જમધ્યમા ।
ષડ્જોદીચ્યવતી ચૈવ પઞ્ચ ષડ્જાશ્રિતાઃ સ્મૃતાઃ ॥ ૫૨॥

ગાન્ધારી રક્તગાન્ધારી મધ્યમા પઞ્ચમી તથા ।
કૈશિકી ચૈવ પઞ્ચૈતા મધ્યમગ્રામસંશ્રયાઃ ॥ ૫૩॥

યાસ્તાઃ સપ્તસ્વરા જ્ઞેયા યાશ્ચૈતાઃ ષટ્સ્વરાઃ સ્મૃતાઃ ।
કદાચિત્ ષાડવીભૂતાઃ કદાચિચ્ચૌડુવે મતાઃ ॥ ૫૪॥

ષડ્જગ્રામે તુ સમ્પૂર્ણા વિજ્ઞેયા ષડ્જકૈશિકી ।
ષટ્સ્વરા ચૈવ વિજ્ઞેયા ષાડ્જી ગાન્ધારયોગતઃ ॥ ૫૫॥

ગાન્ધારપઞ્ચમી ચૈવ મધ્યમોદીચ્યવા તથા ।
પુનશ્ચ ષટ્સ્વરા જ્ઞેયા ગાન્ધારોદીચ્યવા બુધૈઃ ॥ ૫૬॥

આન્ધ્રી ચ નન્દયન્તી ચ મધ્યમગ્રામસંશ્રયાઃ ।
એવમેતા બુધૈર્જ્ઞેયા દ્વૈગ્રામિક્યોઽપિ જાતયઃ ॥ ૫૭॥

અત ઊર્ધ્વં પ્રવક્ષ્યામિ તાસામંશવિકલ્પનમ્ ।
ષટ્સ્વરાઃ સપ્તમે હ્યંશે નેષ્યન્તે ષડ્જમધ્યમાઃ ॥ ૫૮॥

સંવાદ્યલોપાદ્ગાન્ધારે તદ્વદેવ હિ નેષ્યતે ।
ગાન્ધારીરક્તગાન્ધારીકૈશિકીનાં તુ પઞ્ચમઃ ॥ ૫૯॥

ષડ્જાયાં ચૈવ ગાન્ધારમંશકં વિદ્ધિ ષાડવમ્ ।
ષાડવં ધૈવતે નાસ્તિ ષડ્જોદીચ્યામથાંશકે ॥ ૬૦॥

સંવાદ્યલોપાત્સપ્તૈતાઃ ષાટ્સ્વર્યેણ વિવર્જિતાઃ ।
ગાન્ધારીરક્તગાન્ધાર્યોઃ ષડ્જમધ્યમપઞ્ચમાઃ ॥ ૬૧॥

સપ્તમશ્ચૈવ વિજ્ઞેયો યેષુ નૌડુવિતં ભવેત્ ।
દ્વૌ ષડ્જમધ્યમાંશો તુ ગાન્ધારોઽથ નિષાદવાન્ ॥ ૬૨॥

ઋષભશ્ચૈવ પઞ્ચમ્યાં કૈશિક્યાં ચૈવ ધૈવતઃ ।
એવં તુ દ્વાદશૈવેહ વર્જ્યાઃ પઞ્ચ સ્વરાઃ સદા ॥ ૬૩॥

તાસ્ત્વનૌડુવિતા નિત્યં કર્તવ્યા હિ સ્વરાશ્રયાઃ ।
સર્વસ્વરાણાં નાશસ્તુ વિહિતસ્ત્વથ જાતિષુ ॥ ૬૪॥

ન મધ્યમસ્ય નાશસ્તુ કર્તવ્યો હિ કદાચન ।
સર્વસ્વરાણાં પ્રવરો હ્યનાશી મધ્યમઃ સ્મૃતઃ ।
ગાન્ધર્વકલ્પે વિહિતઃ સામસ્વપિ ચ મધ્યમઃ ॥ ૬૫॥

દશકં જાતિલક્ષણમ્ -
ગ્રહાંશૌ તારમન્દ્રૌ ચ ન્યાસોઽપન્યાસ એવ ચ ।
અલ્પત્વં ચ બહુત્વં ચ ષાડવૌડુવિતે તથા ॥ ૬૬॥

અથ ગ્રહાઃ ।
ગ્રહાસ્તુ સર્વજાતીનામંશવત્પરિકીર્તિતાઃ ।
યત્પ્રવૃત્તં ભવેદ્ગેયમંશો ગ્રહવિકલ્પિતઃ ॥ ૬૭॥

તત્રાંશો નામ -
યસ્મિન્ ભવતિ રાગશ્ચ યસ્માચ્ચૈવ પ્રવર્તતે ।
મન્દ્રશ્ચ તારમન્દ્રશ્ચ યોઽત્યર્થં ચોપલભ્યતે ॥ ૬૮॥

ગ્રહાપન્યાસવિન્યાસસંન્યાસન્યાસગોચરઃ ।
અનુવૃત્તશ્ચ યસ્યેહ સોંઽશઃ સ્યાદ્દશલક્ષણઃ ॥ ૬૯॥

પઞ્ચસ્વરપરા તારગતિર્યથા
અંશાત્તારગતિં વિદ્યાદાચતુર્થસ્વરાદિહ ।
આ પઞ્ચમાત્પઞ્ચમાદ્વા નાતઃપરમિહેષ્યતે ॥ ૭૦॥

ત્રિધા મન્દ્રગતિઃ । અંશપરા ન્યાસપરા અપરન્યાસપરા ચેતિ ।
મન્દ્રસ્ત્વંશપરો નાસ્તિ ન્યાસૌ તુ દ્વૌ વ્યવસ્થિતૌ ।
ગાન્ધારન્યાસલિઙ્ગે તુ દૃષ્ટમાર્ષભસેવનમ્ ॥ ૭૧॥

અથ ન્યાસ એકવિંશતિસઙ્ખ્યઃ । અઙ્ગસમાપ્તૌ ન્યાસઃ ।
તદ્વદપન્યાસો હ્યઙ્ગમધ્યે ષટ્પઞ્ચાશત્સઙ્ખ્યઃ ।

યથા -
ન્યાસોઽઙ્ગસમાપ્તૌ સ ચૈકવિંશતિસઙ્ખ્યસ્તથા ।
૧૬ અક્ષરાણિ ષટ્પઞ્ચાશત્સંખ્યોઽપન્યાસોઽઙ્ગમધ્યે ભવેત્ ॥ ૭૨॥

તત્ર પ્રથમં વિદારીમધ્યે ન્યાસસ્વરપ્રયુક્તસ્તુ ।
વિવદનશીલં મુક્ત્વા સંન્યાસઃ સોઽભિધાતવ્યઃ ।
કૃત્વા પદાવસાને વિન્યાસાત્ક્વાપિ વિન્યાસઃ ॥ ૭૩॥

તથા -
અલ્પત્વેઽથ બહુત્વે બલવદબલતા વિનિશ્ચયાદેવ ।
જાતિસ્વરૈસ્તુ નિત્યં જાત્યલ્પત્વં દ્વિવિધમેતત્ ॥ ૭૪॥

સઞ્ચારાંશે  બલસ્થાનામલ્પત્વે દુર્બલાસુ ચ ।
ન્યાસશ્ચાન્તરમાર્ગસ્તુ જાતીનાં વ્યક્તિકારકઃ ॥ ૭૫॥

પઞ્ચસ્વરમૌડુવિતં વિજ્ઞેયં દશવિધં પ્રયોગજ્ઞૈઃ ।
ત્રિંશત્પ્રકારવિહિતં પૂર્વોક્તં લક્ષણં ચાસ્ય ॥ ૭૬॥

ષટ્સ્વરસ્ય પ્રયોગોઽસ્તિ તથા પઞ્ચસ્વરસ્ય ચ ।
ચતુઃસ્વરપ્રયોગોઽપિ હ્યવકૃષ્ટધ્રુવાસ્વિહ ॥ ૭૭॥

દ્વૈગ્રામિકીણાં જાતીનાં સર્વાસામપિ નિત્યશઃ ।
અંશાસ્ત્રિષષ્ટિર્વિજ્ઞેયાસ્તેષાં ચૈવાંશવદ્ ગ્રહાઃ ॥ ૭૮॥

અંશગ્રહમિદાનીં વક્ષ્યામઃ । તત્ર -
મધ્યમોદીચ્યવાયાસ્તુ નન્દયન્ત્યાસ્તથૈવ ચ ।
તથા ગાન્ધારપઞ્ચમ્યાઃ પઞ્ચમોંઽશો ગ્રહસ્તથા ॥ ૭૯॥

ધૈવત્યાશ્ચ તથા હ્યંશૌ વિજ્ઞેયૌ ધૈવતર્ષભૌ ।
પઞ્ચમ્યાશ્ચ તથા જ્ઞેયૌ ગ્રહાંશૌ પઞ્ચમર્ષભૌ ॥ ૮૦॥

ગાન્ધારોદીચ્યવાયાસ્તુ ગ્રહાંશૌ ષડ્જમધ્યમૌ ।
આર્ષભ્યાશ્ચ ગ્રહા અંશા ધૈવતર્ષભસપ્તમાઃ ॥ ૮૧॥

ગાન્ધારશ્ચ નિષાદશ્ચ હ્યાર્ષભશ્ચ તથાપરઃ ।
નિષાદિન્યાસ્ત્રયો હ્યેતે ગ્રહા અંશાશ્ચ કીર્તિતાઃ ॥ ૮૨॥

ષડ્જપઞ્ચમગાન્ધારૈસ્ત્રિભિરેવ પ્રકીર્તિતાઃ ।
અંશૈર્ગ્રહૈસ્તથા ચૈવ વિજ્ઞેયા ષડ્જકૈશિકી ॥ ૮૩॥

ષડ્જશ્ચ મધ્યમશ્ચૈવ નિષાદો ધૈવતસ્તથા ।
ષડ્જોદીચ્યવતીજાતેર્ગ્રહા અંશાશ્ચ કીર્તિતાઃ ॥ ૮૪॥

પઞ્ચમશ્ચાર્ષભશ્ચૈવ નિષાદો ધૈવતસ્તથા ।
કાર્માર્વ્યા બુધૈરંશા ગ્રહાશ્ચ પરિકીર્તિતાઃ ॥ ૮૫॥

ગાન્ધારશ્ચાર્ષભશ્ચૈવ પઞ્ચમોઽથ નિષાદવાન્ ।
ચત્વરોંશા ભવન્ત્યાન્ધ્યા ગ્રહાશ્ચૈવ તથૈવ હિ ॥ ૮૬॥

ષડ્જશ્ચાથર્ષભશ્ચૈવ મધ્યમઃ પઞ્ચમસ્તથા ।
મધ્યમાયા ગ્રહા જ્ઞેયા અંશાશ્ચૈવ સધૈવતાઃ ॥ ૮૭॥

નિષાદષડ્જગાન્ધારમધ્યમાઃ પઞ્ચમસ્તથા ।
ગાન્ધારીરક્તગાન્ધાર્યોર્ગ્રહા અંશાઃ પ્રકીર્તિતાઃ ॥ ૮૮॥

ષડ્જી ધૈવતગાન્ધારષડ્જમધ્યમપઞ્ચમૈઃ ।
ગ્રહૈરંશૈશ્ચ વિજ્ઞેયા વિકૃતા સ્વરયોગતઃ ॥ ૮૯॥

કૈશિક્યાશ્ચાર્ષભં હિત્વા ગ્રહાંશાઃ ષટ્ સ્વરાઃ સ્મૃતાઃ ।
સપ્તસ્વરગ્રહાંશા તુ વિજ્ઞેયા ષડ્જમધ્યમા ॥ ૯૦॥

એતે ત્રિષષ્ટિર્વિજ્ઞેયાઃ સર્વાસ્વંશાસ્તુ જાતિષુ ।
અંશવચ્ચ ગ્રહાસ્તાસાં સર્વાસામેવ નિત્યશઃ ॥ ૯૧॥

સર્વાસામેવ જાતીનાં ત્રિજાતિસ્તુ ગણઃ સ્મૃતઃ ।
તે ચ સપ્ત ગણા જ્ઞેયા વર્ધમાનસ્વરા બુધૈઃ ॥ ૯૨॥

એકસ્વરો દ્વિસ્વરશ્ચ ત્રિસ્વરોઽથ ચતુઃસ્વરઃ ।
પઞ્ચસ્વરશ્ચતુર્થા સ્યાદેકધા સપ્તષટ્સ્વરૌ ॥ ૯૩॥

એતદુક્તં મયા ત્વાસાં ગ્રહાંશપરિકલ્પનમ્ ।
પુનશ્ચૈવ પ્રવક્ષ્યામિ ન્યાસાપન્યાસયોગતઃ ॥ ૯૪॥

પઞ્ચાંશા તુ ભવેત્ ષાડ્જી નિષાદર્ષભવર્જિતા ।
અપન્યાસો ભવેદત્ર ગાન્ધારઃ પઞ્ચમસ્તથા ॥ ૯૫॥

ન્યાસશ્ચાત્ર ભવેત્ ષડ્જો લોપ્યઃ સપ્તમ એવ ચ ।
ષડ્જગાન્ધારસઞ્ચારઃ ષડ્જધૈવતયોસ્તથા ॥ ૯૬॥

ષાડવં સપ્તમોપેતમલ્પૌ વૈ સપ્તમર્ષભૌ ।
ગાન્ધારસ્ય ચ બાહુલ્યં ત્વત્ર કાર્યં પ્રયોક્તુભિઃ ॥ ૯૭॥

આર્ષભ્યામૃષભસ્ત્વંશો નિષાદો ધૈવતસ્તથા ।
એત એવ હ્યપન્યાસા ન્યાસશ્ચાપ્યૃષભઃ સ્મૃતઃ ।
ષટ્પઞ્ચસ્વરતા ચાત્ર ષડ્જપઞ્ચમયોર્વિના ॥ ૯૮॥

ધૈવત્યાં ધૈવતો ન્યાસસ્ત્વંશાવૃષભધૈવતો ।
અપન્યાસા ભવન્ત્યત્ર ધૈવતાર્ષભમધ્યમાઃ ॥ ૯૯॥

ષડ્જપઞ્ચમહીનં તુ પાઞ્ચસ્વર્યં વિધીયતે ।
પઞ્ચમેન વિના ચૈવ ષાડવં પરિકીર્તિતમ્ ॥ ૧૦૦॥

આરોહિણૌ ચ તૌ કાર્યૌ લઙ્ઘનીયૌ તથૈવ ચ ।
નિષાદશ્ચર્ષભશ્ચૈવ ગાન્ધારો બલવાંસ્તથા ॥ ૧૦૧॥

નિષાદિન્યાં નિષાદોંડશો સગાન્ધારર્ષભસ્તથા ।
એત એવ હ્યપન્યાસા ન્યાસશ્ચૈવાત્ર સપ્તમઃ ॥ ૧૦૨॥

ધૈવત્યા ઇવ કર્તવ્યે ષાડવૌડુવિતે તથા ।
તદ્વચ્ચ લઙ્ઘનીયૌ તુ બલવન્તૌ તથૈવ ચ ॥ ૧૦૩॥

અંશાસ્તુ ષડ્જકૈશિક્યાઃ ષડ્જગાન્ધારપઞ્ચમાઃ ।
અપન્યાસા ભવન્ત્યત્ર ષડ્જપઞ્ચમસપ્તમાઃ ॥ ૧૦૪॥

ગાન્ધારશ્ચ ભવેન્ન્યાસો હૈનસ્વર્યં ન ચાત્ર તુ ।
દૌર્બલ્યં ચાત્ર કર્તવ્યં ધૈવત(મધ્યમ) સ્યાર્ષભસ્ય ચ ॥ ૧૦૫॥

ષડ્જશ્ચ મધ્યમશ્ચૈવ નિષાદો ધૈવતસ્તથા ।
સ્યુઃ ષડ્જોદીચ્યવાંશાસ્તુ ન્યાસશ્ચૈવ તુ મધ્યમઃ ॥ ૧૦૬॥

અપન્યાસો ભવત્યસ્ય ધૈવતઃ ષડ્જ એવ ચ ।
પરસ્પરાંશગમનમિષ્ટતશ્ચ વિધીયતે ॥ ૧૦૭॥

ષાટ્સ્વર્યમૃષભાપેતં કાર્યં ગાન્ધર્વવેદિભિઃ ।
પઞ્ચમાર્ષભહીનં તુ પાઞ્ચસ્વર્યં તુ તત્ર વૈ ॥ ૧૦૮॥

ષડ્જશ્ચાપ્યૃષભશ્ચૈવ ગાન્ધારશ્ચ બલી ભવેત્ ।
ગાન્ધારસ્ય ચ બાહુલ્યં મન્દ્રસ્થાને વિધીયતે ॥ ૧૦૯॥

સર્વેંશાઃ ષડ્જમધ્યાયામપન્યાસાસ્તથૈવ ચ ।
ષડ્જશ્ચ મધ્યમશ્ચાપિ ન્યાસૌ નાર્યૌ પ્રયોક્તૃભિઃ ॥ ૧૧૦॥

ગાન્ધારસપ્તમાપેતં પાઞ્ચસ્વર્યં વિધીયતે ।
ષાડવં સપ્તમાપેતં કાર્યં ચાત્ર પ્રયોગતઃ ॥ ૧૧૧॥

સર્વસ્વરાણાં સઞ્ચાર ઇષ્ટતસ્તુ વિધીયતે ।
ષડ્જગ્રામાશ્રિતા હ્યેતા વિજ્ઞેયાઃ સપ્ત જાતયઃ ॥ ૧૧૨॥

અતઃ પરં પ્રવક્ષ્યામિ મધ્યમગ્રામસંશ્રયાઃ ।
ગાન્ધાર્યાઃ પઞ્ચ એવાંશા ધૈવતર્ષભવર્જિતાઃ ॥ ૧૧૩॥

ષડ્જશ્ચ પઞ્ચમશ્ચૈવ હ્યપન્યાસૌ પ્રકીર્તિતૌ ।
ગાન્ધારશ્ચ ભવેન્ન્યાસઃ ષાડવં ચર્ષભં વિના ॥ ૧૧૪॥

ધૈવતર્ષભયોર્હીનં તથા ચૌડુવિતં ભવેત્ ।
લઙ્ઘનીયૌ ચ તૌ નિત્યમાર્ષભાદ્ધૈવતં વ્રજેત્ ।
વિહિતસ્ત્વિતિ ગાન્ધાર્યાઃ સ્વરન્યાસાંશગોચરઃ ॥ ૧૧૫॥

લક્ષણં રક્તગાન્ધાર્યા ગાન્ધાર્યા એવ યત્સ્મૃતમ્ ।
ધૈવતો બલવાનત્ર દૌર્બલ્યં તસ્ય લોપતઃ ॥ ૧૧૬॥

ગાન્ધારષડ્જયોશ્ચાત્ર સઞ્ચારશ્ચાર્ષભાદ્વિના ।
અપન્યાસસ્તથા ચૈવ મધ્યમસ્તુ વિધીયતે ॥ ૧૧૭॥

ગાન્ધારોદીચ્યવાંશૌ તુ વિજ્ઞેયૌ ષડ્જમધ્યમૌ ।
પાઞ્ચસ્વર્યં ન ચૈવાત્ર ષાટ્સ્વર્યમૃષભં વિના ॥ ૧૧૮॥

કાર્યશ્ચાન્તરમાર્ગશ્ચ ન્યાસોપન્યાસ એવ ચ ।
ષડ્જોદીચ્યવતીવત્તુ પાઞ્ચસ્વર્યેણ જાતુચિત્ ॥ ૧૧૯॥

મધ્યમાયા ભવન્ત્યંશા વિના ગાન્ધારસપ્તમૌ ।
એત એવ હ્યપન્યાસા ન્યાસશ્ચૈવ તુ મધ્યમઃ ॥ ૧૨૦॥

ગાન્ધારસપ્તમાપેતં પાઞ્ચસ્વર્યં વિધીયતે ।
ષાડવં ચાપ્યગાન્ધારં કર્તવ્યં તુ પ્રયોગતઃ ॥ ૧૨૧॥

ષડ્જમધ્યમયોશ્ચાત્ર કાર્યં બાહુલ્યમેવ હિ ।
ગાન્ધારલઙ્ઘનં ચાત્ર કાર્યં નિત્યં પ્રયોક્તૃભિઃ ॥ ૧૨૨॥

મધ્યમોદીચ્યવા પૂર્ણા હ્યંશ એકસ્તુ પઞ્ચમઃ ।
શેષો વિધિસ્તુ કર્તવ્યો ગાન્ધારોદીચ્યવાં ગતઃ ॥ ૧૨૩॥

દ્વાવંશાવથ પઞ્ચમ્યામૃષભઃ પઞ્ચમસ્તથા ।

સ(ઋ)નિષાદાવપન્યાસૌ ન્યાસશ્ચૈવ તુ પઞ્ચમઃ ॥ ૧૨૪॥

મધ્યમાવત્તુ કર્તવ્યે ષાડવૌડુવિતે તથા ।
દૌર્બલ્યં ચાત્ર કર્તવ્યં ષડ્જગાન્ધારમધ્યમૈઃ ॥ ૧૨૫॥

કુર્યાદપ્યત્ર સઞ્ચારં પઞ્ચમસ્યાર્ષભસ્ય ચ ।
ગાન્ધારગમનં ચૈવ કાર્યં ત્વલ્પશ્ચ (લ્પં ચ)
સપ્તમઃ (માત્) ॥ ૧૨૬॥

અથ ગાન્ધારપઞ્ચમ્યાઃ પઞ્ચમોંઽશઃ પ્રકીર્તિતઃ ।
તારગત્યા તુ ષડ્જોઽપિ કદાચિન્નાતિવર્તતે ॥ ૧૨૭॥

ઋષભઃ પઞ્ચમશ્ચૈવ હ્યપન્યાસૌ પ્રકીર્તિતૌ ।
ન્યાસશ્ચૈવ તુ ગાન્ધારો સા ચ પૂર્ણસ્વરા સદા ।
પઞ્ચમ્યા યશ્ચ ગાન્ધાર્યાઃ સઞ્ચારઃ સ વિધીયતે ॥ ૧૨૮॥

પઞ્ચમશ્ચાર્ષભશ્ચૈવ ગાન્ધારોઽથ નિષાદવાન્ ।
ચત્વારોંઽશા ભવન્ત્યાન્ધ્ર્યામપન્યાસાસ્ત એવ હિ ॥ ૧૨૯॥

ગાન્ધારશ્ચ ભવેન્ન્યાસઃ ષડ્જાપેતં તુ ષાડવમ્ ।
ગાન્ધારાર્ષભયોશ્ચાપિ સઞ્ચારસ્તુ પરસ્પરમ્ ॥ ૧૩૦॥

સપ્તમસ્ય ચ ષષ્ઠસ્ય ન્યાસો ગત્યનુપૂર્વશઃ ।
ષડ્જસ્ય લઙ્ઘનં ચાત્ર નાસ્તિ ચૌડુવિતં સદા ॥ ૧૩૧॥

નન્દયન્ત્યાઃ ક્રમાન્ ન્યાસાપન્યાસાંશાઃ પ્રકીર્તિતાઃ ।
ગાન્ધારો મધ્યમશ્ચૈવ પઞ્ચમશ્ચૈવ નિત્યશઃ ॥ ૧૩૨॥

ષડ્જો લોપ્યશ્ચ લઙ્ઘ્યશ્ચ નાન્ધ્રીસઞ્ચરણં ભવેત્ ।
લઙ્ઘનં હ્યૃષભસ્યાપિ તચ્ચ મન્દ્રગતં સ્મૃતમ્ ॥ ૧૩૩॥

તારગત્યા તુ ષડ્જસ્તુ કદાચિન્નાતિવર્તતે ।
ગાન્ધારો વા ગ્રહઃ કાર્યસ્તથા ન્યાસશ્ચ નિત્યશઃ ॥ ૧૩૪॥

કાર્મારવ્યાઃ સ્મૃતા હ્યંશા આર્ષભઃ પઞ્ચમસ્તથા ।
ધૈવતશ્ચ નિષાદશ્ચાપ્યપન્યાસાસ્ત એવ તુ ।
પઞ્ચમશ્ચ ભવેન્ન્યાસો હૈનસ્વર્યં ન ચાત્ર તુ ॥ ૧૩૫॥

ગાન્ધારસ્ય વિશેષેણ સર્વતો ગમનં ભવેત્ ॥ ૧૩૬॥

કૈશિક્યાસ્તુ તથા હ્યંશાઃ સર્વે ચૈવાર્ષભં વિના ।

એત એવ હ્યપન્યાસા ન્યાસૌ ગાન્ધારસપ્તમૌ ॥ ૧૩૭॥

ધૈવતેંશે નિષાદે ચ ન્યાસઃ પઞ્ચમ ઇષ્યતે ।
અપન્યાસઃ કદાચિત્તુ ઋષભોઽપિ વિધીયતે ॥ ૧૩૮॥

આર્ષભે ષાડવં ચાત્ર ધૈવતર્ષભવર્જિતમ્ ।
તથા ચૌડુવિતં કુર્યાદ્ બલિનૌ ચાન્ત્યપઞ્ચમૌ ॥ ૧૩૯॥

દૌર્બલ્યમૃષભસ્યાત્ર લઙ્ઘનં ચ વિશેષતઃ ।
અંશવત્ કલ્પિતશ્ચાન્યૈઃ ષાડવે તુ વિધીયતે ।
ષડ્જમધ્યાવદત્રાપિ સઞ્ચારસ્તુ ભવેદિહ ॥ ૧૪૦॥

એવમેતા બુધૈર્જ્ઞેયા જાતયો દશલક્ષણાઃ ।
યથા યસ્મિન્ રસે યાશ્ચ ગદતો મે નિબોધત ॥ ૧૪૧॥

॥ ઇતિ જાતિવિકલ્પાધ્યાયોઽષ્ટાવિંશઃ સમાપ્તઃ॥

Encoded by Haresh BakShi hareshbakShi@hotmail.com

*Natya Shastra Chapter 28*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*